(शोधलेखनाम- वैदिकछन्दांसि : महत्त्वं स्वरूपञ्च) (341)

UGC Approved Journal No – 40957

(IIJIF) Impact Factor- 4.172

Regd. No. : 1687-2006-2007 ISSN 0974 - 7648

# JIGYASA

## AN INTERDISCIPLINARY PEER REVIEWED REFEREED RESEARCH JOURNAL

Chief Editor : *Indukant Dixit*

Executive Editor : *Shashi Bhushan Poddar*

Editor

*Reeta Yadav*

| Volume 12 | April 2019 | No. III |
|---|---|---|

*Published by*

PODDAR FOUNDATION

Taranagar Colony

Chhittupur, BHU, Varanasi

www.jigyasabhu.blogspot.com

www.jigyasabhu.com

E-mail : jigyasabhu@gmail.com

Mob. 9415390515, 0542 2366370

**JIGYASA, ISSN 0974-7648, Vol. 12, No. III, April 2019**


- **पारसी-हिंदी रंगमंच और हिन्दुस्तानी सिनेमा** 563-569
  ***जयन्त रैना,*** शोध छात्र, हिन्दी विभाग, कला संकाय, काशी हिन्दू विश्वविद्यालय, वाराणसी।
- **गांधी की दृष्टि में शिक्षा : नैतिक एवं आत्मिक उत्थान के कारक के रूप में** 570-573
  ***डॉ. प्रतिमा सिंह,*** अतिथि प्रवक्ता, दर्शनशास्त्र विभाग, वसन्त कन्या महाविद्यालय, कमच्छा, वाराणसी
- **वैदिकछन्दांसि : महत्त्वं स्वरूपञ्च** 574-580
  ***डॉ. आचार्य बृहस्पति मिश्र,*** प्रवक्ता, संस्कृत महाविद्यालय, श्री नयनादेवी जि. बिलासपुरम्, हि.प्र.

# वैदिकछन्दांसि : महत्त्वं स्वरूपञ्च

*डॉ. आचार्य बृहस्पति मिश्र **

वेदाः सर्वप्रथमं ज्ञानविज्ञानयोः स्वरूपप्रवर्तकत्वात् सम्मानिताःसर्वत्र। वेदानामध्ययनमिह अनिवार्यत्वेन अपरिहार्यत्वेन च प्रशस्तम्। वेदार्थबोधकाः वेदव्याख्यानग्रन्थाः वेदाङ्गानि। वेदाङ्गेषु छन्दसां महत्त्वम् शास्त्रेषु प्रथतितत्वात् वेदार्थस्य प्रकाशकत्वात् च सुस्पष्टम्।

**छन्दसां महत्त्वम्** : छन्दसां महत्त्वं प्रकटयन् नाट्यशास्त्रस्य प्रवक्ता आचार्य भरतः वदति –

**'छन्दहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम्'**[1]अर्थात् छन्दसः रहितः कश्चन शब्दः नास्ति तथा च शब्दरहित किञ्चिद् छन्दः नास्ति अर्थात छन्दशब्दयोः अन्योन्याश्रयत्वम् इव परस्परसम्बद्ध अस्तित्वं वर्तते। एतत् एव तथ्यं निरुक्तटीकायां दुर्गः अनुवदति। **'नाच्छन्दसि वागुच्चरति'**[2] इति। एकत्र ऋग्यजुपरिशिष्टे लिखितमस्ति-

**'छन्दोभूतमिदं सर्वं वाङ्मयं स्याद्विजानतः।**
**नाच्छन्दसि न चापृष्ठे शब्दश्चरति कश्चन।।'**[3]

आचार्य जयकीर्ति स्वकीये छन्दोऽनुशासने प्रमाणयति **'छन्दोभाग्वाङ्मयं सर्वं न किञ्चिच्छन्दसां विना'**[4]।

छन्दसः **परिभाषा**

कि छन्दः इति परिपृच्छायाम् ऋक्सर्वानुक्रमण्याम् आचार्य कात्यायनः वदति **'यदक्षरपरिमाणं तच्छन्द'**[5] इति अर्थात् यत्र अक्षराणां परिगणनं कृत्वा पृथक्-पृथक् परिमाणं क्रियते तत् छन्दः। एतदेव बृहत्सर्वानुक्रमण्याम् उच्यते **'छन्दोऽक्षरसंख्यावच्छेदकमुच्यते'**[6]।

वेदाः अपि प्रमाणयन्ति अक्षरेण मिमते सप्तवाणी[7]।

अक्षरे एव सप्तवाणी वागधिष्ठितानि सप्तच्छन्दांसि मिमते निर्माण कुर्वन्ति।

**'अक्षरैः पादाः परिमीयन्ते परिमितैः पादैश्छन्दांसि'**[8]।

अत्र स्पष्टतया वक्तुं पारयामः यत् यत्र अक्षरगणनया पादनिर्मितिः भवति तथा पादगणनया यस्य निश्चयः भवति तच्छन्दः अथवा अक्षरगणनया पादगणनया च यस्य निश्चयः भवति तच्छन्दः।

**छन्दस् शब्दस्य निर्वचनानि**

प्राचीनवाङ्मये तथा आधुनिकेषु ग्रन्थेषु 'छन्दस्'शब्दस्य अनेकानि निर्वचनानि उपवर्णितानि यथा-

क. **'छन्दांसि छन्दयतीति '**।[9]

ख. **'ते छन्दोभिरात्मानंछादयित्वोपायँस्तच्छन्दसां छन्दस्त्वम्'**।।[10]

ग. **'यदस्मा अच्छदयंस्तस्माच्छन्दांसि'**[11]

---

* प्रवक्ता, संस्कृत महाविद्यालय, श्री नयनादेवी जि. बिलासपुरम्, हि.प्र.